# ॥ वाल्मीकि रामायण॥

## ६ युद्धकाण्ड

### अध्याय ८२

तानि नागसहस्राणि सारोहाणां च वाजिनाम् ।
रथानां चाग्निवर्णानां सध्वजानां सहस्रशः ॥१॥

राक्षसानां सहस्राणि गदापरिघयोधिनाम् ।
काञ्चनध्वजचित्राणां शूराणां कामरूपिणाम् ॥२॥

निहतानि शरैस्तीक्ष्णैस्तप्तकाञ्चनभूषणैः ।
रावणेन प्रयुक्तानि रामेणाक्लिष्टकर्मणा ॥३॥

दृष्ट्वा श्रुत्वा च सम्भ्रान्ता हतशेषा निशाचराः ।
राक्षस्यश्च समागम्य दीनाश्चिन्तापरिप्लुताः ॥४॥

विधवा हतपुत्राश्च क्रोशन्त्यो हतबान्धवाः ।
राक्षस्यः सह सङ्गम्य दुःखार्ताः पर्यदेवयन् ॥५॥

कथं शूर्पणखा वृद्धा कराला निर्णतोदरी ।
आससाद वने रामं कन्दर्पमिव रूपिणम् ॥६॥

सुकुमारं महासत्त्वं सर्वभूतहिते रतम् ।
तं दृष्ट्वा लोकवध्या सा हीनरूपा प्रकामिता ॥७॥

कथं सर्वगुणैर्हीना गुणवन्तं महौजसं ।
सुमुखं दुर्मुखी रामं कामयामास राक्षसी ॥८॥

जनस्यास्याल्पभाग्यत्वात्पलिनी श्वेतमूर्धजा ।
अकार्यमपहास्यं च सर्वलोकविगर्हितम् ॥९॥

राक्षसानां विनाशाय दूषणस्य खरस्य च ।
चकाराप्रतिरूपा सा राघवस्य प्रधर्षणम् ॥१०॥

तन्निमित्तमिदं वैरं रावणेन कृतं महत् ।
वधाय नीता सा सीता दशग्रीवेण रक्षसा ॥११॥

न च सीतां दशग्रीवः प्राप्नोति जनकात्मजाम् ।
बद्धं बलवता वैरमक्षयं राघवेण ह ॥१२॥

वैदेहीं प्रार्थयानं तं विराधं प्रेक्ष्य राक्षसं ।
हतमेकेन रामेण पर्याप्तं तन्निदर्शनम् ॥१३॥

चतुर्दशसहस्राणि रक्षसां भीमकर्मणाम् ।
निहतानि जनस्थाने शरैरग्निशिखोपमैः ॥१४॥

खरश्च निहतः सङ्ख्ये दूषणस्त्रिशिरास्तथा ।
शरैरादित्यसङ्काशैः पर्याप्तं तन्निदर्शनम् ॥१५॥

हतो योजनबाहुश्च कबन्धो रुधिराशनः ।
क्रोधार्तो विनदन्सोऽथ पर्याप्तं तन्निदर्शनम् ॥१६॥

जघान बलिनं रामः सहस्रनयनात्मजम् ।
बालिनं मेघसङ्काशं पर्याप्तं तन्निदर्शनम् ॥१७॥

ऋश्यमूके वसञ्शैले दीनो भग्नमनोरथः ।
सुग्रीवः स्थापितो राज्ये पर्याप्तं तन्निदर्शनम् ॥१८॥

धर्मार्थसहितं वाक्यं सर्वेषां रक्षसां हितम् ।
युक्तं विभीषणेनोक्तं मोहात्तस्य न रोचते ॥१९॥

विभीषणवचः कुर्याद्यदि स्म धनदानुजः ।
श्मशानभूता दुःखार्ता नेयं लङ्का पुरी भवेत् ॥२०॥

कुम्भकर्णं हतं श्रुत्वा राघवेण महाबलम् ।
प्रियं चेन्द्रजितं पुत्रं रावणो नावबुध्यते ॥२१॥

मम पुत्रो मम भ्राता मम भर्ता रणे हतः ।
इत्येवं श्रूयते शब्दो राक्षसानां कुले कुले ॥२२॥

रथाश्चाश्वाश्च नागाश्च हताः शतसहस्रशः ।
रणे रामेण शूरेण राक्षसाश्च पदातयः ॥२३॥

रुद्रो वा यदि वा विष्णुर्महेन्द्रो वा शतक्रतुः ।
हन्ति नो रामरूपेण यदि वा स्वयमन्तकः ॥२४॥

हतप्रवीरा रामेण निराशा जीविते वयम् ।
अपश्यन्त्यो भयस्यान्तमनाथा विलपामहे ॥२५॥

रामहस्ताद्दशग्रीवः शूरो दत्तवरो युधि ।

इदं भयं महाघोरमुत्पन्नं नावबुध्यते ॥ २६॥

न देवा न च गन्धर्वा न पिशाचा न राक्षसाः ।
उपसृष्टं परित्रातुं शक्ता रामेण संयुगे ॥ २७॥

उत्पाताश्चापि दृश्यन्ते रावणस्य रणे रणे ।
कथयिष्यन्ति रामेण रावणस्य निबर्हणम् ॥ २८॥

पितामहेन प्रीतेन देवदानवराक्षसैः ।
रावणस्याभयं दत्तं मानुषेभ्यो न याचितम् ॥ २९॥

तदिदं मानुषान्मन्ये प्राप्तं निःसंशयं भयम् ।
जीवितान्तकरं घोरं रक्षसां रावणस्य च ॥ ३०॥

पीड्यमानास्तु बलिना वरदानेन रक्षसा ।
दीप्तैस्तपोभिर्विबुधाः पितामहमपूजयन् ॥ ३१॥

देवतानां हितार्थाय महात्मा वै पितामहः ।
उवाच देवताः सर्वा इदं तुष्टो महद्वचः ॥ ३२॥

अद्य प्रभृति लोकांस्त्रीन्सर्वे दानवराक्षसाः ।
भयेन प्रावृता नित्यं विचरिष्यन्ति शाश्वतम् ॥ ३३॥

दैवतैस्तु समागम्य सर्वैश्चेन्द्रपुरोगमैः ।
वृषध्वजस्त्रिपुरहा महादेवः प्रसादितः ॥ ३४॥

प्रसन्नस्तु महादेवो देवानेतद्वचोऽब्रवीत् ।
उत्पत्स्यति हितार्थं वो नारी रक्षःक्षयावहा ॥ ३५॥

एषा देवैः प्रयुक्ता तु क्षुद्यथा दानवान्पुरा ।
भक्षयिष्यति नः सीता राक्षसघ्नी सरावणान् ॥ ३६॥

रावणस्यापनीतेन दुर्विनीतस्य दुर्मतेः ।
अयं निष्टानको घोरः शोकेन समभिप्लुतः ॥ ३७॥

तं न पश्यामहे लोके यो नः शरणदो भवेत् ।
राघवेणोपसृष्टानां कालेनेव युगक्षये ॥ ३८॥

इतीव सर्वा रजनीचरस्त्रियः
परस्परं सम्परिरभ्य बाहुभिः ।
विषेदुरार्तातिभयाभिपीडिता
विनेदुरुच्चैश्च तदा सुदारुणम् ॥ ३९॥

The files in this directory are revised versions of the digital files produced by Professor Muneo Tokunaga, Kyoto University, and copyrighted by him. I am grateful to Professor Tokunaga for his agreement to this use of his original files and for permitting the revised versions to be made publicly available.
Dr J. D. Smith ; email: jds10@cam.ac.uk ; http://bombay.oriental.cam.ac.uk/index.html

ITRANS conversion questions to: Avinash Chopde ¡avinash@acm.org¿

Last updated on March 25, 1998; Send corrections to sanskrit@cheerful.com